শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী অলগিয মণৱাল জীযর্ অনুগৃহীতং

# ॥ শ্রী নৃসিংহাষ্টকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী নৃসিংহাষ্টকম্ ॥

শ্রীমদকলঙ্কপরিপূর্ণশশিকোটি -
শ্রীধর মনোহর সটাপটলকান্ত।
পালয কৃপালয ভৱাম্বুধি নিমগ্নং
দৈত্যৱরকাল নরসিংহ ! নরসিংহ ! ॥ 1 ॥

পাদকমলাৱনতপাতকিজনানাং
পাতকদৱানল পতত্রিৱরকেতো।
ভাৱন পরাযণ ভৱার্তিহরযা মাং
পাহি কৃপযৈৱ নরসিংহ ! নরসিংহ ! ॥ 2 ॥

তুঙ্গনখ পঙ্ক্তি দলিতাসুরৱরাসৃক্ -
পঙ্কনৱকুঙ্কুমৱিপঙ্কিলমহোরঃ।
পণ্ডিতনিধান কমলালয নমস্তে
পঙ্কজনিষণ্ণ নরসিংহ ! নরসিংহ ! ॥ 3 ॥

মৌলিষু ৱিভূষণমিৱামরৱরাণাং
যোগিহৃদযেষু চ শিরস্সু নিগমানাম্।
রাজদরৱিন্দরুচিরং পদযুগং তে
দেহি মম মূর্ধ্নি নরসিংহ ! নরসিংহ ! ॥ 4 ॥

ৱারিজৱিলোচন মদন্তিমদশাযাং
ক্লেশৱিৱশীকৃতসমস্তকরণাযাম্।
এহি রমযা সহ শরণ্য ! ৱিহগানাং
নাথমধিরুহ্য নরসিংহ ! নরসিংহ ! ॥ 5 ॥

হাটককিরীটৱরহারৱনমালা -
তাররশনামকরকুণ্ডলমণীন্দ্রৈঃ।
ভূষিতমশেষ নিলযং তৱ ৱপুর্মে
চেতসি চকাস্তু নরসিংহ ! নরসিংহ !॥ **6**॥

ইন্দুরৱিপাৱকৱিলোচন রমাযাঃ
মন্দির মহাভুজলসদ্ৱররথাঙ্গ !।
সুন্দর চিরায রমতাং ৎৱযি মনো মে
নন্দিতসুরেশ নরসিংহ ! নরসিংহ !॥ **7**॥

মাধৱ মুকুন্দ মধুসূদন মুরারে
ৱামন নৃসিংহ শরণং ভৱ নতানাম্।
কামদ ঘৃণিন্ নিখিলকারণ নযেযং
কালমমরেশ নরসিংহ ! নরসিংহ !॥ **8**॥

অষ্টকমিদং সকলপাতকভযঘ্নং
কামদমশেষদুরিতামযরিপুঘ্নম্।
যঃ পঠতি সন্ততমশেষনিলযং তে
গচ্ছতি পদং স নরসিংহ ! নরসিংহ !॥ **9**॥

॥ ইতি শ্রী নৃসিংহাষ্টকং সমাপ্তম্ ॥

prapatti.com